# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा नवम्बर्-दिसम्बर् - २०१६

| | | |
|---|---|---|
| कक्षा - आचार्यप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् - ३** | गुणाः - ७० |
| विषयः - नव्यव्याकरणम् | **कोड -** C.C-4.1.2 | समयः - ३:०० तः ६:०० |
| दिनाङ्कः - ७.१२.२०१६ | सन्दर्भग्रन्थः - वैयाकरणसिद्धान्तकौमुदी (वैदिकी प्रक्रिया) | |

---

प्रथमान्वितिः (युनिट - १)

प्रश्नः १ निम्नलिखितयोरेकस्य सूत्रस्य सोदाहरणं व्याख्या कार्या- (४)

क. छन्दसि पुनर्वस्वोरेकवचनम्।

ख. द्वितीया ब्राह्मणे।

प्रश्नः २ "षष्ठीयुक्तश्छन्दसि वा" सूत्रस्य ससन्दर्भं सोदाहरणञ्च व्याख्या कार्या। (१२)

**अथवा**

"मन्त्रे घस-ह्वर-णश-वृ-दहाद्-वृज्-कृ-गमि-जनिभ्यो लेः" सूत्रस्य ससन्दर्भं सोदाहरणञ्च व्याख्या कार्या।

प्रश्नः ३ निम्नलिखितेषु प्रश्नेषु चतुर्णां प्रश्नानां लघूत्तरंलेख्यम्- (४)

क. अयस्मयादीनि पदानि कुत्र सिद्धानि भवन्ति?

ख. 'स सुष्टुभा स ऋक्वता गणेन' इत्यत्र 'ऋक्वता' पदे भत्वात् कस्य अभावो भवति?

ग. "इन्धिभवतिभ्यां च" सूत्रेण अपित् लिट् किं भवति?

घ. जुहोतेः कर्मणि तृतीयाविभक्त्या सह अन्या का विभक्तिर्भवति?

ङ. "बहुलं छन्दसि" सूत्रेण अदः स्थाने क आदेशो भवति?

च. हेमन्तश्च शिशिरञ्च इति हेमन्तशिशिरौ इति समासस्य लिङ्गं पूर्वपदमनुसरति परपदं वा?

द्वितीयान्वितिः (युनिट - २)

प्रश्नः ४ निम्नलिखितयोरेकस्य सूत्रस्य सोदाहरणं व्याख्या कार्या- (४)

क. अभ्युत्सादयांप्रजनयांचिकयांरमयामकः पावयांक्रियाद् विदामक्रन्निति छन्दसि।

ख. छन्दसि वनसनरक्षिमथाम्।

प्रश्नः ५ "छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्य-स्ताव्योपचाय्यपृडानि" इति सूत्रस्य ससन्दर्भं सोदाहरणञ्च व्याख्या कार्या। (१२)

**अथवा**

"व्यत्ययो बहुलम्" इति सूत्रस्य ससन्दर्भं सोदाहरणञ्च व्याख्या कार्या।

प्रश्नः ६ निम्नलिखितेषु प्रश्नेषु चतुर्णां प्रश्नानां लघूत्तरं देयम्- (४)

क. "गुपेश्छन्दसि" सूत्रेण च्लेः स्थाने क आदेशो भवति?

ख. "नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः" सूत्रमिदं च्लेः स्थाने कस्य आदेशस्य निषेधं करोति?

ग. "छन्दसि सहः" सूत्रेण कस्य प्रत्ययस्य विधानं भवति?

घ. "कव्यपुरीषपुरीष्येषु ञ्युट्" सूत्रेण ञ्युट्प्रत्ययस्य विधानं कस्माद् धातोः क्रियते?

ङ. "छन्दसि लिट्" सूत्रेण कस्मिन् अर्थे लिट्लकारः क्रियते?

च. "आत ऐ" सूत्रेण कस्मिन् लकारे आकारस्य स्थाने 'ऐ' आदेशः क्रियते?

तृतीयान्वितिः (युनिट - ३)

प्रश्नः ७ निम्नलिखितयोरेकस्य सूत्रस्य सोदाहरणं व्याख्या कार्या- (४)

क. इयाडियाजीकाराणामुपसंख्यानम्

ख. लोपस्त आत्मनेपदेषु

प्रश्नः ८ "सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजाल" सूत्रस्य ससन्दर्भं सोदाहरणञ्च व्याख्या कार्या। (८)

**अथवा**

"दाधर्त्ति-दधर्त्ति-दधर्षि-बोभूतु-तेतिक्तेऽलर्ष्याऽऽपनीफणत्संसनिष्यदत्-करिक्रत्-कनिक्रत्-भरिभ्रत्-दविध्वतो दविद्युतत्-तरित्रतःसरीसृपतं-वरीवृजन्मर्मृज्याऽऽगनीगन्तीति च" इति सूत्रस्य ससन्दर्भं सोदाहरणञ्च व्याख्या कार्या।

प्रश्नः ९ निम्नलिखितेषु त्रयाणां प्रश्नानां लघूत्तरंलेख्यम्- (३)

क. "नेतराच्छन्दसि" इति सूत्रेण इतर-शब्दात् परयोः स्वमोः स्थाने कस्य आदेशस्य निषेधः क्रियते?

ख. "अमो मश्" सूत्रेण मिबादेशस्यामः स्थाने क आदेशो भवति?

ग. केन सूत्रेण छन्दसि ध्वमः स्थाने 'ध्वात्' आदेशो भवति?

घ. केन सूत्रेण लोटो मध्यमपुरुषबहुवचनस्य'त' आदेशस्य स्थाने 'तात्' आदेशो भवति?

ङ. "मीनातेर्निगमे" सूत्रेण शिति परे किं कार्यं भवति?

चतुर्थान्वितिः (युनिट - ४)

प्रश्नः १० निम्नलिखितयोरेकस्य सूत्रस्य सोदाहरणं व्याख्या कार्या- (४)

क. प्रसमुपोदः पादपूरणे

ख. क्षियाशीःप्रैषेषु तिङाकाङ्क्षम्।

प्रश्नः ११ "नसत्तनिषत्तानुत्तप्रतूर्त्तसूर्त्तगूर्त्तानि छन्दसि" सूत्रस्य ससन्दर्भं सोदाहरणञ्च व्याख्या कार्या। (८)

**अथवा**

"स्वरितमाम्रेडितेऽसूयासम्मतिकोपकुत्सनेषु" इति सूत्रस्य ससन्दर्भं सोदाहरणञ्च व्याख्या कार्या।

प्रश्नः १२ निम्नलिखितेषु त्रयाणां प्रश्नानां लघूत्तरं लेख्यम्- (३)

क. "छन्दसीरः" इति सूत्रेण मतोर्मस्य स्थाने क आदेशो भवति?

ख. "अतो नुट्" सूत्रेण कस्य नुट्-आगमो भवति?

ग. "नाद्घस्य" सूत्रेण घ-संज्ञकस्य प्रत्ययस्य क आगमो भवति?

घ. "विचार्यमाणानाम्" सूत्रेण किं कार्यं भवति?

ङ. "उभयथर्क्षु" सूत्रेण कस्य स्थाने रुर्वा भवति?

***